# प्रथमसत्रीया परीक्षा
## आदर्श-प्रश्नपत्रम् (बहुविकल्पात्मकम्) - 2021-22
## कक्षा - दशमी
## संस्कृतम् (कोड-122)

**समयः – सार्धैक-होरा** **सम्पूर्णाङ्काः – 40**

| | | |
|---|---|---|
| | **अनुप्रयुक्त-व्याकरणम्** | |
| 1. | **अधोलिखितवाक्येषु रेखाङ्कितपदस्य सन्धिपदं सन्धिच्छेदपदं वा चिनुत- (केवलं प्रश्नचतुष्टयम्)**<br>(i) महानगरमध्ये **चलदनिशं** कालायसचक्रम्।<br>(क) चलद् + निशम् (ख) चलत् + अनिशम्<br>(ग) चलद् +अनिशम् (घ) चल + दनिशम्<br>(ii) त्वया महत्कौतुकम् आवेदितं **यत् + मानुषादपि** बिभेषि?<br>(क) यत्मानुषादपि (ख) यद्मानुषादपि<br>(ग) यन्मानुषादपि (घ) यतमानुषादपि<br>(iii) अतिदीर्घः **प्रवासः + अयं** दारुणश्च।<br>(क) प्रवासोऽयम् (ख) प्रवासरयम्<br>(ग) प्रवास अयम् (घ) प्रवासोयम्<br>(iv) अचिरादेव चण्डवातेन **मेघरवैश्च** प्रवर्षः समजायत।<br>(क) मेघः + रवैश्च (ख) मेघरवै + च<br>(ग) मेघ + रवैश्च (घ) मेघरवैः + च<br>(v) **अयमेकः + तावत्** विभज्य भुज्यताम्।<br>(क) अयमेकश्तावत् (ख) अयमेकष्तावत्<br>(ग) अयमेकस्तावत् (घ) अयमेको तावत् | 1×4=4 |
| 2. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत– (केवलं प्रश्नचतुष्टयम्)**<br>(i) कुत्सितवस्तुमिश्रितं भक्ष्यं **समलं** धरातलम्।<br>(क) मलस्य योग्यम् (ख) मलं मलं प्रति<br>(ग) मलेन सहितम् (घ) मलस्य अभावः<br>(ii) **भयेन आकुलं** व्याघ्रं दृष्ट्वा कश्चित् धूर्तः श्रृगालः हसन्नाह।<br>(क) भयेनाकुलम् (ख) भयाकुलम्<br>(ग) भयकुलम् (घ) भयाआकुलम् | 1×4=4 |

| | | |
|---|---|---|
| | (iii) ततः प्रविशतः विदूषकेनोपदिश्यमानमार्गौ तापसौ **कुशलवौ**।<br>(क) कुशः च लवः च (ख) लवः च कुशः च<br>(ग) लवयोः च कुशयोः च (घ) कुशस्य च लवस्य च<br>(iv) कश्चित् कृषक: बलीवर्दाभ्यां **क्षेत्रस्य कर्षणं** कुर्वन्नासीत्।<br>(क) क्षेत्राकर्षणम् (ख) क्षेत्रं कर्षणम्<br>(ग) क्षेत्रस्यकर्षणम् (घ) क्षेत्रकर्षणम्<br>(v) श्रीरामः **सवाष्पम्** अवलोकयति।<br>(क) वाष्पस्य सहितम् (ख) सवः च वाष्पं च<br>(ग) वाष्पेन सहितम् (घ) वाष्पस्य अभावः | |
| 3. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चिनुत- (केवलं प्रश्नचतुष्टयम्)**<br>(i) अन्योऽपि **बुद्धिमान्** लोके मुच्यते महतो भयात् ।<br>(क) बुद्धि + तल् (ख) बुद्धि + टाप्<br>(ग) बुद्धि + मतुप् (घ) बुद्धि + त्व<br>(ii) नवमालिका रसालं **मिलिता** रुचिरं संगमनम्।<br>(क) मिलित + टाप् (ख) मिल् + टाप्<br>(ग) मिल् + त्व (घ) मिल् + क्त<br>(iii) बुद्धिः **बल + मतुप्** तन्वि सर्वकार्येषु सर्वदा।<br>(क) बलमती (ख) बलवान्<br>(ग) बलवती (घ) बलवत्यः<br>(iv) आकारस्य **लघु+त्व** कार्यबाधकः न भवेत्।<br>(क) लघुत्ता (ख) लघुत्वम्<br>(ग) लघुत्वा (घ) लघुत्वः<br>(v) वेदानां **महत्त्वं** को न जानाति।<br>(क) महत् + त्त्वा (ख) मह + त्व<br>(ग) महत्त् + त्व (घ) महत् + त्व | 1×4=4 |
| 4. | **वाच्यस्य नियमानुगुणम् उचितं विकल्पं चिनुत। (केवलं प्रश्नत्रयम्)**<br>(i) बालकः ---------------------- खादति।<br>(क) पायसम् (ख) पायसः<br>(ग) पायसेन (घ) पायसस्य | 1×3=3 |

| | | |
|---|---|---|
| | (ii) --------------------- चित्राणि दृश्यन्ते ।<br>(क) अहम्  (ख) माम्<br>(ग) मया  (घ) मह्यम्<br>(iii) मात्रा रोटिकाः --------------- ।<br>(क) पचति  (ख) पच्यन्ते<br>(ग) पच्यते  (घ) पचन्ति<br>(iv) -------------------- फलानि आनयति ।<br>(क) पितरः  (ख) पितरौ<br>(ग) पित्रा  (घ) पिता | |
| 5. | **प्रदत्तेभ्यः विकल्पेभ्यः समुचितं कालबोधकशब्दं चिनुत - (केवलं प्रश्नचतुष्टयम्)**<br>(i) माता प्रात: --------------------- (08:00) उत्तिष्ठति ।<br>(क) सार्ध-अष्टवादने  (ख) अष्टवादने<br>(ग) पादोन-अष्टवादने  (घ) आष्टवादने<br>(ii) चेतक-एक्सप्रेस इति रेलयानं --------------------- (4:45) देहलीम् आगच्छति।<br>(क) सार्ध-चतुर्वादने  (ख) पादोन-चतुर्वादने<br>(ग) पादोन–पञ्चवादने  (घ) सपाद – चतुर्वादने<br>(iii) मल्लिका --------------------- (7:30) प्रातराशं करोति।<br>(क) सार्ध-सप्तवादने  (ख) सपाद-सप्तवादने<br>(ग) पादोन-सप्तवादने  (घ) सप्तवादने<br>(iv) राहुल: प्रातर्भ्रमणाय --------------------- (6:15) उद्यानं गच्छति।<br>(क) षड्वादने  (ख) सार्ध-षड्वादने<br>(ग) पादोन-षड्वादने  (घ) सपाद-षड्वादने<br>(v) रेलयानमेकं -------------------------- (1:15) उत्तराञ्चलं प्रति गच्छति।<br>(क) सार्ध-एकवादने  (ख) सपाद-एकवादने<br>(ग) पादोन-एकवादने  (घ) एकवादने | 1×4=4 |
| 6. | **वाक्यानुगुणम् उचिताव्ययपदं चिनुत - (केवलं प्रश्नत्रयम्)**<br>(i) दुर्वहम् ----------------------- जीवितं जातं प्रकृतिरेव शरणम्।<br>(क) तर्हि  (ख) शनैः<br>(ग) सहसा  (घ) अत्र<br>(ii) यत्रास्ते सा धूर्ता -------------------- गम्यताम्।<br>(क) तत्र  (ख) अत्र<br>(ग) अन्यत्र  (घ) अपि | 1×3=3 |

| | | |
|---|---|---|
| | (iii) सः दीनः इति जानन् ----------------- कृषकः तं बहुधा पीडयति।<br>(क) श्वः (ख) कुतः<br>(ग) अपि (घ) ह्यः<br>(iv) रामम् उपसृत्य प्रणम्य ---------------------- कुशलवौ वदतः।<br>(क) वृथा (ख) च<br>(ग) ह्यः (घ) इतस्तत | |
| 7. | **अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। शुद्धं पदं विकल्पेभ्यः चिनुत- (केवलं प्रश्नत्रयम्)**<br>(i) त्वं पाठं <u>पठति</u>।<br>(क) पठथ (ख) पठसि<br>(ग) पठन्ति (घ) पठथः<br>(ii) <u>फलाः</u> करण्डके सन्ति।<br>(क) फलम् (ख) फलः<br>(ग) फलानि (घ) फले<br>(iii) तौ बालकौ <u>गच्छति</u>।<br>(क) गच्छसि (ख) गच्छन्ति<br>(ग) गच्छति (घ) गच्छतः<br>(iv) राधा श्वः <u>गच्छति</u>।<br>(क) गमिष्यति (ख) अगच्छत्<br>(ग) गच्छतु (घ) गच्छसि | 1×3=3 |
| | **पठितावबोधनम्** | |
| 8. | **रेखाङ्कित-पदानि आधृत्य समुचितं प्रश्नवाचकपदं चिनुत- (केवलं प्रश्नपञ्चकम्)**<br>(i) अत्र जीवितं <u>दुर्वहं</u> जातम्।<br>(क) किम् (ख) कीदृशः<br>(ग) कीदृशम् (घ) कम्<br>(ii) सः ऋषभः हलमूढ्वा गन्तुमशक्तः <u>क्षेत्रे</u> पपात।<br>(क) कस्मै (ख) के<br>(ग) कदा (घ) कुत्र<br>(iii) त्वं <u>मानुषात्</u> बिभेषि।<br>(क) कस्मात् (ख) कुतः<br>(ग) कस्याः (घ) कति | 1×5=5 |

| | | |
|---|---|---|
| | (iv) **<u>आर्यस्य</u>** वन्दनायां लव इत्यात्मानं श्रावयामि।<br>(क) कस्मिन् (ख) कस्य<br>(ग) कस्याः (घ) कस्मै<br>(v) अयम् **<u>अन्येभ्यो</u>** दुर्बलः।<br>(क) के (ख) काभ्यः<br>(ग) कस्मात् (घ) केभ्यः<br>(vi) **<u>तपोवने</u>** तस्य नाम व्यवहरति।<br>(क) कुत्र (ख) के<br>(ग) कस्याम् (घ) कुतः | |
| 9. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकुलम् उचितार्थं चिनुत- (केवलं प्रश्नचतुष्टयम्)**<br>(i) भयङ्करा व्याघ्रमारी **<u>तूर्णं</u>** धाविता ।<br>(क) मन्दम् (ख) शीघ्रम्<br>(ग) वृथा (घ) पुरतः<br>(ii) व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचित्तो **<u>नष्टः</u>**।<br>(क) खादितः (ख) दत्तः<br>(ग) कृतः (घ) पलायितः<br>(iii) सुरभिवचनं श्रुत्वा **<u>भृशं</u>** विस्मितस्याखण्डलस्यापि हृदयमद्रवत्।<br>(क) अतिन्यूनम् (ख) वृषभम्<br>(ग) बहु अधिकम् (घ) अनेकवारम्<br>(iv) किं कुपिता एवं **<u>भणति</u>**, उत प्रकृतिस्था?<br>(क) कथयति (ख) ताडयति<br>(ग) गर्जति (घ) हसति<br>(v) एकान्ते **<u>कान्तारे</u>** क्षणमपि मे स्यात् सञ्चरणम् ।<br>(क) ग्रामे (ख) नगरे<br>(ग) वने (घ) कृषकस्य गृहे | 1×4=4 |
| 10. | **भाषिककार्यसम्बद्धानां प्रश्नानां समुचितम् उत्तरं विकल्पेभ्यः चिनुत – (केवलं प्रश्नषट्कम्)**<br>(i) "क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारम् यत्नमकरोत्" अस्मिन् वाक्ये विशेष्यपदं किम्?<br>(क) क्रुद्धः (ख) कृषीवलः<br>(ग) बहुवारम् (घ) तम्<br>(ii) "यदि एवं तर्हि मां निजगले बद्ध्वा चल सत्वरम्।' अत्र 'शीघ्रम्' पदस्य पर्यायपदं किम्?<br>(क) यदि (ख) बद्ध्वा<br>(ग) सत्वरम् (घ) तर्हि | 1×6=6 |

| | | |
|---|---|---|
| | (iii) "जानाम्यहं तस्य नामधेयम्।" अत्र क्रियापदं किम्?<br>(क) जानामि (ख) अहम्<br>(ग) जानाम्यम् (घ) तस्य<br>(iv) "सः कृच्छ्रेण भारमुद्वहति।" अत्र 'सरलतया' इत्यस्य किं विलोमपदं प्रयुक्तम्?<br>(क) सः (ख) कृच्छ्रेण<br>(ग) उद्वहति (घ) भारम्<br>(v) "यानानां पङ्क्तयो ह्यनन्ताः।" अस्मिन् वाक्ये किं विशेषणपदं प्रयुक्तम्?<br>(क) यानानाम् (ख) पङ्क्तयः<br>(ग) अनन्ताः (घ) हि<br>(vi) ''सः व्याघ्रः तथा कृत्वा काननं ययौ।" अत्र कर्तृपदं किम्?<br>(क) सः (ख) व्याघ्रः<br>(ग) काननम् (घ) ययौ<br>(vii) "अतिदीर्घः प्रवासोऽयं दारुणश्च।" अत्र विशेष्यपदं किम्?<br>(क) अतिदीर्घः (ख) अयम्<br>(ग) दारुणः (घ) प्रवासः<br>(viii) "दुर्दान्तैर्दशनैरमुना स्यान्नैव जनग्रसनम्" अत्र 'दन्तैः' इत्यर्थे किं पदं दत्तम्?<br>(क) दुर्दान्तैर्दशनैः (ख) दर्दान्तैः<br>(ग) दशनैः (घ) जनग्रसनम् | |

**********************************************